12. छन्दपूर्तये स्वरभक्त्या: प्रयोग: वैदिकसंस्कृते विहित: आसीत्, यथा– स्वर् सुवर, पृथ्वी पृथिवी, दर्शत दरशत, इत्यादय:; किन्तु लौकिकसंस्कृते स्वरभक्त्या: प्रयोग: न भवति।

13. वैदिकसंस्कृते तु जर्फरी, तुर्फरी, अर्जुनी, अक्तु, श्वेत्या, गातु, ग्मा इत्याद: शब्दा: आसन्, किन्तु लौकिक-संस्कृते इमा: शब्दा: विलुप्ता: सन्ति।

14. वैदिकभाषायां लिट्-लकारस्य प्रयोग: वर्तमानकाले भवति; किन्तु लौकिकभाषायां लिट्-लकारस्य प्रयोग: परोक्षभूतकाले भवति।

15. वैदिकभाषायां लुङ्-लङ्-लिट्-लकाराणां प्रयोग: यस्य कस्यापि लकारस्य स्थाने सम्भवमासीत्; किन्तु लौकिकसंस्कृते एतादृशी व्यवस्था नास्त्येव।

16. वैदिकसंस्कृते षष्ठ्या: स्थाने चतुर्थी तथा चतुर्थ्या: स्थाने षष्ठी भवितुं शक्नोति, किन्तु लौकिकसंस्कृते सामान्यतया एवं भवितुं न शक्नोति।।

14. वैदिकव्याख्या-पद्धति: (Customs of Vedic Commentaries)

1. भारतीयपद्धति:

भाषाविज्ञान-विशारदानां विदुषां मन्तव्यमस्ति यत् आर्यभाषा-सेमेटिकभाषयोश्चेति द्वयोरेव भाषयोर्व्यवहर्त्तार: सभ्यतां संस्कृतिञ्च सृष्टवन्त:। आर्यभाषाऽपि पाश्चात्यपौरस्त्य-भेदेन द्विविधा। अस्मिन्नार्यभाषाया: पाश्चात्यप्रभेदे यूरोपीयदेशस्य प्राचीना आधुनिक्यश्च ग्रीक-लैटिन-फ्रेञ्च-जर्मन-आङ्ग्ल-प्रभृतयो भाषा: समायान्ति। आर्यभाषाया: पौरस्त्यप्रभेदे ईरानीभाषा संस्कृतभाषा च समागच्छत:। ईरानीभाषा 'जिन्द-ए-अवेस्ता' इति नाम्ना व्यवह्रियते, यत्र पारसीकानां धर्मग्रन्था: निबद्धा: सन्ति। संस्कृतभाषायां भारतीयानां धर्मग्रन्था निबद्धा इति सुप्रसिद्धमेव।

कालक्रमेणात्यन्तातीतकाले निर्मितस्य कस्याऽपि ग्रन्थस्याशयस्य अवबोधस्तदुत्तरकालिकसन्ततिक्रमेभ्योऽतीव दुरूहो व्यापारो भवति। यदा प्राक्तनत्वेन सह भावानां गाम्भीर्यं भाषायाश्च काठिन्यमपि समायाति, तदा तु समस्येयमतीव विषमा भवति। वेदार्थानुशीलनस्य विषये कथनमिदमक्षरश: समुपयुक्तमस्ति।

वेदास्तु प्रथमं तावत् स्वयं कस्यापि दूरालोकगतस्याऽतीत-कालस्य कृतयस्सन्ति, तदुपरि भाषाया: वैषम्यं विचारधाराया गाम्भीर्यञ्च सर्वत्र दरीदृश्यते। फलत: वेदार्थाऽवबोधनं, गवेषणं, मर्मान्वेषणञ्चैका दुर्बोधप्रहेलिकाऽभवत्। तथापि अस्या: प्रहेलिकाया: अर्थावबोधनस्योचितोद्योग: प्राचीन-कालादेव समायाति। यास्कमहोदयस्य निरुक्तेऽस्योद्योगस्य किञ्चिदाभासोऽपि मिलति।

'षड्भावविकारा भवन्तीति वार्ष्यायणि:। जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति।' अस्मिन् प्रसङ्गे वर्णनमपि यास्कस्य द्रष्टव्यम्। तस्य मते तु प्राचीना:-ऋषय: स्वकीयेन तपोबलेन धर्मस्य साक्षात्कारं कृतवन्त:। किन्तु अर्वाचीना: ऋषयस्तद्वद्धर्मस्य साक्षाद्दर्शनं कर्तुं नाशक्नुवन्। अपरकालिकानामृषीणामीदृशी शक्तिहीनतां दृष्ट्वा दयावशेन तै: मन्त्राणामुपदेश: तेभ्य: ग्रन्थतो वाऽर्थत उभयप्रकारेण दत्त:।

प्राचीना: ऋषयस्तु श्रवणं विनैव धर्माणां साक्षाद्दर्शनं कृतवन्त:। अत: धर्मस्य साक्षाद्दर्शनकर्तृत्वेन तेषामृषित्वं स्वत: सिद्ध एवाऽऽसीत्। किञ्चार्वाचीना: ऋषयस्तु ग्रन्थरूपेण च श्रवणं कृतवन्त: तत: ते धर्मदर्शने कृतकृत्या: अभवन्। अत: श्रवणानन्तरदर्शनयोग्यतासम्पादनेनैतेषामृषीणामुपयुक्ता अभिधा 'श्रुतर्षि' एवाऽभवत्। 'अवरेभ्योऽवरकालिकेभ्य: शक्तिहीनेभ्य: श्रुतर्षिभ्य:। तेषां हि श्रुत्वा तत्पश्चादृषित्वम् उपजायते न यथा पूर्वेषां साक्षात्कृद्धर्माणां श्रवणमन्तरेणैव'। एते श्रुतर्षय एव लोकहिताय वेदार्थावबोधनस्योपयोगिन: शिक्षा-निरुक्तादि-वेदाङ्गानां रचनां कृतवन्त:।

आधुनिकास्तु दुरूहताया: दोषारोपणं कृत्वा वेदार्थानां विस्मरणं न कुर्यु:, वेदमूलकाचाराद्धर्माद्वा विमुखा: न भवेयुरिति समुन्नतया भावनया प्रेरिता भूत्वा प्राचीना ऋषिगणा: वेदार्थोपदेशाय सन्ततं जागरूका: आसन्।

वेदानां गम्भीरार्थबोधने प्रथमोद्योग: कठिनमस्ति। यास्क-विरचित-निरुक्तादपि प्राचीनतर: निघण्टुग्रन्थोऽस्ति, तत्र वैदिक-शब्दानां विस्तृतव्याख्याऽस्ति। निघण्टुशब्दस्याप्यर्थो भवति '**शब्दानां सूची**' निघण्टग्रन्थे संहिताया: कठिना: सन्दिग्धार्थशब्दाश्चैकत्र समाहरणं कृत्वा तेषामर्थस्य तत्र सूचना मिलति। समुपलब्धग्रन्थेषु निघण्टावेव वेदार्थस्फुटीकरणस्य प्रथम: प्रयास: परिलक्षितो भवति।

प्रातिशाख्यानामपि रचना तत्कालिकी किंवा तत्पूर्ववर्तिनी नैवासीत्। ग्रन्थेष्वेतेषु वैदिकभाषाया: विचित्रपदानां, स्वराणां सन्धिपदानाञ्चैव विवेचनमस्ति। साक्षाद्रूपेण पदार्थ-पर्यालोचनस्यास्मिन् ग्रन्थे नितान्त अभाव एवाऽस्ति। पुराऽनेकानां निरुक्तग्रन्थानां सत्ताऽऽसीत्। येषां सूचना अवान्तरग्रन्थेषु यत्र तत्रोद्धरणरूपेण समुपलब्धा भवति, तदपि वेदार्थविवेचनस्य विस्तृतयोजनाया: सर्वाधिकगौरवशालीग्रन्थ: यास्कविरचितनिरुक्तम् एवाऽस्ति। ग्रन्थरत्नस्यास्य परीक्षणेन अनेकविधानां ज्ञातव्यविषयाणां पर्याप्तबोधो भवति। ग्रन्थेऽस्मिन् यत्र-तत्र यास्केन औपमन्यव-शाटायन-शाकपूणि-शाकल्यप्रभृतीनां बहूनां निरुक्ताचार्याणां ऐतिहासिक-याज्ञिक-नैदानिकप्रभृति-व्याख्याकर्तृणां क्रमश: व्यक्तिगताना

सामूहिकानाञ्च सम्मत्या उल्लेखः समादरेण कृतः। अनेन ज्ञायते यद्वेदार्थानुशीलनस्य परम्परा अतीव प्राचीनकालादेव समायाति।

यास्कमहोदयेन स्वनिरुक्ते (1.15) कस्याऽपि कौत्स-नामकस्य आचार्यमतस्य उल्लेखः कृतः। न जाने, कौत्सनामकः कोऽप्याचार्य आसीन्न वेति। वस्तुतः कौत्सोऽयं कोऽप्यैतिहासिकः पुरुषः आसीदथवा केवलं पूर्वपक्षनिमित्तेन स्थापितः कोऽपि यास्ककल्पनाप्रसूतो व्यक्तिरासीत्। कौत्स-महोदयस्य सम्मतिरियमस्ति यन्मन्त्राः निरर्थकाः भवन्ति–'**अनर्थका हि मन्त्राः। तदेतेन उपेक्षितव्यम्। यदि मन्त्रार्थ-प्रत्यया अनर्थकं भवतीति कौत्सः' (निरुक्तम्** 1.5)। कथनस्यास्य सम्पुष्ट्यर्थं तत्रानेकविधाः युक्तयः प्रदर्शितास्तेन। कौत्समतमेव परवर्तिनः चार्वाक-बौद्ध-जैन-प्रभृति-वेद-निन्दकाः स्वीकृतवन्तः।

यास्क-महोदयस्य सिद्धान्तपक्षः

1. लौकिकभाषायामपि पदानां नियतप्रयोगस्तथा पदक्रमस्य नियतरूपः दृग्गोचरो भवत्येव। यथा–'इन्द्राग्नी' एवं 'पितापुत्रौ'। एतयोः प्रयोगयोरपि न तु क्रमभङ्गं कर्तुं शक्यते न च शब्दपरिवर्तनमेव भवितुमर्हति। एवं नियमाभावे अपि एतेषां शब्दानां सार्थकता स्वतः-सिद्धा एवेति।

2. ब्राह्मणग्रन्थेषु मन्त्राणां विनियोगविधानमुदितानुवादमात्रं एव अस्ति। अर्थात् मन्त्रेषु यस्यार्थस्य प्रतिपादनभीष्टं भवति तस्यैवार्थस्यानुवादो ब्राह्मणग्रन्थेषु वर्त्तते।

3. वैदिकमन्त्राणामर्थोऽनुपपन्नो नास्ति। परशुप्रहारकाले याऽहिंसायाश्चर्चा वर्त्तते साऽपि वेदविहितैवेति। परशुना वृक्षच्छेदनमापाततः हिंसाद्योतकमवश्यमस्ति, किञ्च वेदेनैव ज्ञातो भवति यत्परशुच्छेदनं हिंसाद्योतकन्न भवति। हिंसायाः अहिंसायाश्च सूक्ष्मविवेचनस्यापि ज्ञानं वेदेनैव भवति। यस्मिन् कर्मणि पुरुषः वेदेन नियुक्तो भवति, तत्कर्म अहिंसात्मको भवति तथा यस्मिन् कर्मणि वेदेन पुरुषो निषिद्धो भवति तदेव हिंसात्मको भवति। औषधि-पशु-मृग-वनस्पति-प्रभतीनां यज्ञे उपयोगो भवति। तेन ते परमोत्कर्षं प्राप्नुवन्ति। अतः यज्ञे एतेषां विधानमाभ्युदयिकं भवति न तु हिंसात्मकमिति। अनेन प्रकारेण कस्यापि वृक्षस्य यज्ञार्थं विधिपूर्वकं शाखाच्छेदनमनुग्रहमेवाऽस्ति न तु हिंसेति। इयम् अहिंसा, इयं हिंसा इत्यागमादेतत्प्रतीयते। प्रतिविशिष्टश्चायमेव वैदिक आम्नाय आगमः। एतत्पूर्वकत्वात् अन्येषामागमानाम्। ......अनुगृह्णाति यज्ञविनियोगार्थविधानतः छिन्दन् ॥ दुर्गाचार्यः, निरुक्तस्य टीका ॥ 1.16.6 ॥

4. मन्त्रेषु रुद्रस्यैकत्वमनेकत्वस्योल्लेखेऽपि पारस्परिक-विरोधो नास्ति यतो हि देवा महिमाशालिनो भवन्ति। एकत्वेऽपि तेऽनेकविभूतिषु वर्त्तमानाः भवन्ति। इन्द्रमप्यजातशत्रुस्तथा शत्रुविजेता-कथने न कोऽपि दोषो भवति। वर्णनमिदं रूपकाश्रित-कल्पनायामुपरि अवलम्बितमस्ति। लोकेऽपि शत्रुसम्पन्नत्वेऽपि राजा शत्रुहीनः कथ्यते।

5. यज्ञानुष्ठाने परिचितमपि प्रदत्तसम्प्रेषणा व्यर्थः वक्तुं न शक्यते। यतो विशिष्टातिथेः समागमनोपरि मधुपर्कदानं सर्वविदितमस्ति; तथाऽपि लोकव्यवहारेऽपि विधिज्ञपुरुषात् वारत्रयं मधुपर्कस्य याचना भवत्येव। तद्वदेव ब्राह्मणग्रन्थस्य अपि सम्प्रेषणा नास्ति निरर्थकेति।

6. अदितेः सर्वात्मकत्वेन कथनमपि तस्य महत्ता प्रदर्शने एव निहिताऽस्ति। भक्तिभावेन प्रेरितो भूत्वा कश्चिद्भक्तस्यैव कथनमिदमस्ति।

7. मन्त्राणामर्थः यदि स्पष्टरूपेण ज्ञातो न भवति तदा तस्य ज्ञानार्थं यत्नः कर्त्तव्यः। निरुक्तग्रन्थेषु शब्दानां धातुभिः सह सम्बन्धं स्थापयित्वाऽर्थविधानस्य समुचिता व्यवस्था कृतेति। स्वदोषं परशिरस्याक्षेपणं कियतांशेन युक्तितरं भवति। 'नैष स्थाणोः अपराधः यदेनम् अंधो न पश्यति। पुरुषापराधः स भवति। यथा जानपदीषु विद्यातः पुरुषविशेषो भवति। पारोवर्यवित्सु तु खलु वेदितृषु भूयो विद्यः प्रशस्यो भवति॥ नि. 1.5.1॥ अनेन रूपेणार्थविवेचकस्य ग्रन्थस्याभ्यासः कर्त्तव्यः। उपयोगिनां ग्रन्थानामभ्यासं विना मन्त्राणामुपरि अनर्थकस्य दोषारोपणं नोचितमिति। यथा–'यादृशः', 'जर्भरी' इत्यस्य अर्थो भवति 'भर्त्तारौ। तदैव 'तुर्फरी' इति शब्दस्यार्थो भवति 'हन्तारौ'। अयं प्रसङ्गः मीमांसासूत्रेषु (1-2, 31-53) द्रष्टव्यः।

2. पाश्चात्यपद्धतिः

पाश्चात्यविदुषां मतानुसारेण वेदार्थानुसन्धानविषयेऽद्यत्वे वेदार्थानुशीलनाय तुलनात्मकभाषाशास्त्रस्य ह्यैतिहासिकग्रन्थस्य च अध्ययनस्य आवश्यकता तु अस्त्येव। भारतेतरदेशानाम् आचारव्यवहाराणाम् अध्ययनस्य अप्यपेक्षा तद्वदेवास्ति। यतः एतयोरुभयोः पारस्परिकं तुलनैवास्माकं वैदिकधर्मस्य मूल-स्वरूपस्य परिचयं दातुं शक्यते। अनेनैव कारणेनेयं पद्धतिः (Historical method) इति नाम्ना ख्याताऽस्ति। भारतीय-परम्पराम्प्रति वैदेशिकाः विद्वांसः उदासीना एव सन्ति। अस्मिन् विषये एतेषां विदुषां त्वेतत्पर्यन्तं कथनमस्ति यत् भारतीय-परम्परायाः पक्षधरत्वेन तेषां वेदस्य मूलार्थपर्यन्तमभिगमनमेव न भवति। अतः ब्राह्मणटीकाकर्तृणामुपरि अन्धश्रद्धाक्षेपः कुर्वन्ति आंग्लविद्वांसः। राथप्रभृतिपाश्चात्यालोचकाः भारतीय-पण्डितान् वेदार्थानुसन्धाने सर्वथा अयोग्या एव मन्यन्ते। मन्यन्ते च तान् पाश्चात्यपण्डितान्, योग्याः ये भारतीयपरम्परातः पूर्णतोऽनभिज्ञे सत्यपि भाषाशास्त्रमानवशास्त्रप्रभृतीनां विषयानां ज्ञातारः सन्ति।

अस्यां पद्धतौ सन्ति केचिद् गुणाः, किन्तु बहुविधाः अवगुणा अपि सन्ति। वेदानामाविर्भावोऽस्मिन्नार्यावर्तेऽभवत्। वेदेषु निहितबीजकानि दृष्ट्वैव कालान्तरे स्मृत्यादिग्रन्थानां

प्रणयनमभवत्। वेदाः भारतीयानां स्वकीया समृद्धिरस्ति। अस्माकमृषयः, आत्मज्ञानिनो विद्वांसः, तत्त्वद्रष्टारो महर्षयश्च वेदानां दर्शनं येन रूपेण कृतवन्तस्तेनैव रूपेण तेशामनुशीलनम् अपि अस्माकं कर्त्तव्यमस्ति। तेनैव रूपेण तेषां अर्थबोधः वेदानामर्थस्य वास्तविकमनुशीलनं कथितुं शक्यते। वेदाद्भारतीयतां निस्सार्य भारतेतरधर्मेण विज्ञानेन च साहाय्यं गृहीत्वा तदर्थावबोधनस्य दुःसाहसं मूले कुठाराघात इव भवति नान्यत्। अनेन प्रकारेण वेदानामर्थं कृत्वा वैदिकाचार्याणां विषयेऽनर्गलप्रलापं कथमपि समुचितं न भवेत्। उदाहरणार्थम् एक एव शब्दस्यात्र परीक्षाद्रष्टव्या–

वैदिकयुगेऽस्मिन्देशे लिङ्गपूजाऽसीन्नवेति विषये एते पाश्चात्यविद्वास: येन शब्दबलेन स्वकीयं सिद्धांतं स्थापितवन्तः तत्तु महदुपहसनीयमेव। 'शिश्नदेवः' इति पदस्य प्रयोगः ऋग्वेदे (7.21.5, 10.99.3) द्वयोः स्थानयोः मिलति। पाश्चात्यविद्वांसः शब्दस्यास्योत्तरभागमभिधाप्रधानं मत्वा स्वसिद्धान्तं संस्थाप्य कथयन्ति, यत् वैदिककालेऽप्यस्मिन् देशे लिङ्गपूजायाः प्रचलनमासीत्। किञ्चास्य शब्दस्य वास्तविकार्थोऽयं नास्ति। वस्तुतः देवशब्दोऽत्रालङ्कारिकार्थे 'देव इव' इति व्यवहृतोऽभवत्। वेदेऽन्यत्र प्रयुक्ताः पितृदेव-मातृदेव-आचार्यदेवप्रभृतयः शब्दास्तथैव सन्ति। अत्र देव-शब्दस्यार्थः 'पूजकः' इत्येव भवति नान्यदिति। तैत्तिरीयोपनिषदि (1.1) प्रयुक्तानाम्–'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव' इत्यादीनां शब्दानामर्थो भवति, मातरं देवता इव पूजय, पितरं देवता इव पूजय, आचार्यं देवता इव पूजय। एतेषां शब्दानां व्याख्यानावसरे आचार्यशङ्करो वदति-'देवतावत् उपास्याः एते' इत्यर्थः। श्रद्धादेवशब्दोऽपि शिश्नदेवाद्भिन्नो नास्ति। अतः उभयोः स्थलयोः 'देव' शब्दस्य प्रयोगः आलङ्कारिक एव भवितव्यम्। अस्यां स्थितौ शिश्नदेवस्याप्यर्थो भवति, शिश्नः (लिङ्गः) देवता अस्ति अस्येति, अर्थात् कामक्रीडायां निरतः पुरुषः। अतः यास्केन सायणेन चास्य शब्दस्यार्थः 'अब्रह्मचर्य' एवाऽस्ति। अतोऽत्र भारतीयविद्वांसः संस्कृतभाषायां व्यवहारानुकूलः परम्परागतार्थः 'अब्रह्मचर्यः' एव मन्यन्ते। किञ्च पाश्चात्यविद्वांसोऽत्र प्रयोगमूलकस्य परम्परागतार्थस्योपेक्षां कृत्वा निर्मूलाऽप्रमाणिक-सिद्धान्तस्य उद्भावनां कृतवन्तः। अनेनैव प्रकारेण पारस्कर-गृह्यसूत्रस्य 'कूर्मपित्तमङ्के निधाय जपति' वाक्येऽस्मिन्प्रयुक्तस्य कूर्मपित्त-शब्दस्य परम्परागतार्थस्य जलपूर्णघटस्योपहासं कृत्वा जर्मन-विदुषा ओल्डनवर्गमहोदयेन 'कच्छपपित्तं क्रोडे निधाय' इत्यर्थः कृतः।

अस्माकं वैदिकमन्त्रेषु पाठभेदस्य लेशमात्रमपि सम्भावनं नास्ति। यतो हि पदपाठ-क्रमपाठ-जठापाठ-घनपाठ-प्रभृति-पाठानां कल्पनां कृत्वा मन्त्राणां प्रत्येकपदस्य स्वरूपं स्थापयन्ति भारतीयविद्वांसस्तत्र वर्णभेदस्य का कथाऽस्ति? सूक्ष्मस्वरोऽपि परिवर्तनस्य तत्र स्थानं नास्ति। अस्यां स्थितौ पाठभेदस्य दुरारोहकल्पना नितान्तानुपयुक्ताः भवन्ति।

वेदानां परमोपादेयत्वाद् महर्षयस्तान् रक्षितुम् पूर्णम् उपायञ्चक्रुः। वेदा एतावद्दीर्घकालान्तरमपि लोके समवाप्ताः सन्तीत्यत्र कारणमेष महर्षिकृतः प्रयत्न एवाऽस्ति। महर्षयो हि वेदरक्षार्थमष्टविकृतीनां व्यवस्थां विदधुः। ताः विकृतयः अधः-स्थितेन श्लोकेन अभिव्यक्तीक्रियन्ते–

जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः॥

प्रक्षेपच्युत्यवसादादिविकारेभ्यः परित्रातुं श्रुतिं पद-क्रम-घन-जटादिपाठाः आविष्कृताः। एषां सद्भावेन श्रुतिष्वद्य-पर्यन्तम् अणुमात्रमपि दोषलेशः न प्रविष्टो भवितुमशकत्। प्रातिशाख्यग्रन्था अपि वेदपाठस्य रक्षणार्थं विरचिता अभूवन्। तथापि पाश्चात्याः स्वकल्पितार्थसिद्धये बहुविधविचित्राश्रुत-पूर्वकाविचारितरमणीय-पाठानां स्वेच्छानुकूलोद्भावनाः कृतवन्तः, प्राचीनवैदिकमन्त्रोच्चारणस्य यथार्थस्वरूपवेत्तारः अस्माकं भारतीयवैदिकाः अस्मात् काल्पनिक-शब्दपरिवर्तनादनभिज्ञा एव सन्ति। काल्पनिकपरिवर्त्तन-मिदमशोभनीयमेवेति।

3. आध्यात्मिकपद्धतिः

स्वामीदयानन्दसरस्वतीमहोदयेन कतिपयानां विशिष्टानां वार्त्तानां स्वभाष्ये चर्चा कृताऽस्ति। वेदानामनादित्वस्य सिद्धान्तं प्रतिपादितमनेन विदुषा स्वभाष्ये। अस्य महापुरुषस्य विचारे वेदेषु लौकिकेतिहासस्य सर्वथाऽभावोऽस्ति। वेदेषु प्रयुक्ताः सर्वे शब्दाः यौगिकाः योगरूढाश्च सन्ति न रूढा इति। स्वामिनोऽर्थनिरूपण-पद्धत्याः सिद्धान्तस्याधारशिला इयमेवाऽस्ति। इन्द्राग्निवरुणादि ये देवतावाचकाः शब्दाः सन्ति, ते सर्वे यौगिकत्वेनैकस्यैव परमात्मनः पर्यायवाचका वर्त्तन्ते। स्वामिमहोदयस्त्वेवंविधायाः आध्यात्मिक्याः शैल्याः स्वीकर्ताऽऽसीत्। अंशतः स्वामिनोऽयं सिद्धान्तः समुचित एव प्रतिभाति। नियुक्तकर्ता तु स्पष्टशब्देषु अकथयत्, यावन्तो देवाः सन्ति ते सर्वे एक एव महतः देवस्य परमेश्वरस्य विशिष्टशक्त्याः प्रतीकस्वरूपाः सन्ति। 'महाभाग्यात् देवतायाः एक आत्मा बहुधा स्तूयते। एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति' (निरुक्तः 7.4)। ऋग्वेदस्य स्पष्टप्रतिपादनमस्ति–'**एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः**' (ऋ. सं. 1.164.46)। अतोऽग्निमैश्वर्यशालिनः परमेश्वरस्यैव रूपमस्तीति स्वीकरणन्तु सर्वथोचितमेव। अत्र न कोऽपि विरोधः केषांश्चिदपि प्रतीयते, किञ्च यदाऽस्यां शैल्याम् अग्न्यादिदेवानां प्रत्याख्यानं भवति तदा तु विरोधस्याप्युदयो भवत्येव।

वेदेषु देवतानां स्थानं महत्त्वावहम्। मानवः प्रत्यहं प्रकृतिदेव्याः नानालीलाः पश्यति। वैदिककालस्य महर्षयस्तस्यास्तत्तल्लीलाः अवधारयितुं विभिन्ना देवताः अकल्पयन्। महर्षीणां विश्वासोऽयं यदासां देवतानुकम्पयैव सर्वाणि कार्याणि सम्पद्यन्ते। जगति घट्यमानानां सर्वासामपि घटनानां कारणभूताः देवता एव।

यास्को वदति यद्देवतासु काश्चन पृथिवीस्थानीयाः, काश्चन अन्तरिक्षस्थानीयाः, काश्चन द्युस्थनीयाः सन्ति। पृथ्वीस्थानीय-देवतासु अग्निदेवता, अन्तरिक्षस्थानीयासु इन्द्रदेवता, द्युस्थानीयासु सूर्यविष्णुप्रभृतिदेवताः सन्ति महीयस्यः। ऋग्वेदे हि देवताः प्राणशक्तिशालित्वात् 'असुर' इति प्रोक्ताः। प्रतीच्यानां प्रधीनां देवताः उद्दिश्य विचारोऽयं यद् भौतिकघटनोपपत्त्यै प्राकृतिकानि दृश्यानि देवतात्वेन कल्पितानि। ऋग्वेदस्यादिमे युगे बहुदेवतानां सत्ता अभ्युपेता बभूव। गच्छता कालेन सति मानसिकविकासे देवतानां तासामेकैवाधिपतिः कल्पितोऽभूत्। पुरुषसूक्तं तु सुस्पष्टरूपेण सर्वेश्वरवादं समुपस्थापयति; परं पश्चिमीयानामेष देवताविषयको विचारो नावितथः। देवतावादो न भौतिक एतावान्।

यास्केन निरुक्ते दैवतकाण्डे देवतास्वरूपविवेचनं हि अतिशयं विशदतया अनुष्ठितम्। जगतो मूले एकैव महिमाशालिनी महाशक्तिः शोभते। निरतिशयैश्वर्यशालिनी सा शक्तिः 'ईश्वर' इति गीयते। सैव शक्तिर्बहुभिः प्रकारैः स्तुतेति।

देवताः प्रायेण त्रीणि रूपाणि बिभ्रति—आधिभौतिकम्, आधिदैविकम्, आध्यात्मिकञ्च। इन्द्रियगम्यं रूपमाधिभौतिकं भवति, आधिदैविकमाध्यात्किञ्च स्त इन्द्रियागम्ये। 'विष्णोर्नु कं वीर्याणि...... ।' 'प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे...... ।' इत्यादिमन्त्रैः वेदो विष्णुदेवताया उत्तानि त्रीणि रूपाणि प्रदर्शयति।

मानवा देवतानां तां तां शक्तिं साध्वभिज्ञाय तद्द्वारेणात्मा-नमुपकुर्युरित्येतदर्थं श्रुतिमातरस्तासां रूपाणि अस्मत्पुरः समुपस्थापयन्ति।

मन्त्रैर्हि यदा देवतानां न केवलमेकमपितु एकस्माद् अधिकानि रूपाणि उद्भावितत्तां नीतानि वीक्ष्यन्ते तदा प्रतीच्यानां तस्मिन् वचसि कथं विश्वासो विहितो भवेत्, यत्र देवताः भौतिकदृश्यानामधिष्ठातृत्वेन प्रतीकत्वेन वा कल्प्यन्ते? वेदवर्णितेषु प्रमुखेषु विषयेषु देवता-स्तुतिरप्येकतमः प्रमुखो विषयः।

अनेन विचारेणाग्न्यादिशब्दाः न केवलं परमपदपरमेश्वरस्यैव वाचकाः, अपितु तत्तद्विशिष्टदेवतापदवाचकाः सन्ति। अग्निशब्दोऽत्र भौतिकाग्निपदस्य बोधको भवति; यस्याग्नेः कृपयाऽस्या चराचरस्य सकलव्यवहाराः सिद्ध्यन्ति। शब्दोऽयं तस्य देवस्याऽपि सूचकोऽस्ति, योऽस्य भौतिकाग्नेरप्यधिष्ठाता अस्ति। सहैवाऽसौ जगतोऽस्य नियामकस्य परमात्मनोऽर्थमपि प्रकटयति। अग्निदेवस्यैतानि त्रीणि रूपाण्यपि समुचितान्येव। अग्निमन्त्रस्य सूक्ष्मपर्यालोचनेन सिद्धो भवति यदयमग्निमन्त्रः उपरि वर्णिताग्निदेवस्य त्रीण्यपि रूपाणि समभावेन लक्षयति। अतोऽग्निदेवस्य पूर्ववर्णितं रूपद्वयं समुपेक्ष्याग्निपदं परमपद-वाचकमेवास्तीति कथनं प्राचीनपरम्परायाः सर्वथा विरुद्ध एवाऽस्तीति। अनेनैव कारणेनास्याः शैल्याः सर्वथानुसरणं सर्वमान्यो न भवेदिति।

स्वामी महोदयः ब्राह्मणग्रन्थान् संहिताग्रन्थमिवानादिः प्रामाणिकांश्च नामन्यत्। श्रुतेरन्तर्गते ब्राह्मणग्रन्थानां गणना तस्याभीप्सितो नास्ति। तर्हि संहितायाः स्वरूपदृष्ट्या स्वामिनः सिद्धान्तोऽयमयथार्थ एवाऽस्ति। तैत्तिरीयसंहितायां मन्त्रैः सह ब्राह्मणांशस्यापि गद्यात्मकस्वरूपः समुपलब्धो भवति। एवं सति तैत्तिरीयसंहितायाः भागमेकं श्रुतिरपरभागञ्चाश्रुतिरेवंविधकथनं कीदृग्भवति? स्वामिनोऽनुयायिनां विदुषां सम्मतौ वेदेष्वाधुनिक-भौतिकविज्ञानस्य सर्वेषामाविष्कृतानां पदार्थानां सत्ता स्वीकृताऽस्ति। तर्हि किं वेदस्येयमेव महिमा वर्त्तते यदेतेषु वेदेषु विज्ञानाविष्कृत-सकलवस्तूनां वर्णनमुपलब्धो भवति, वेदास्त्वाध्यात्मिकज्ञानस्य निधय एव सन्ति। भौतिक-विज्ञानाविष्कृत-पदार्थानां वर्णनं नास्ति तेषां प्रयोजनम्। सत्येवं यौगिकप्रक्रियानुसारेणैतेषां भौतिक-विज्ञानाविष्कृतपदार्थानां वेदेष्वस्तित्वस्वीकरणं नोपयुक्तं प्रतिभाति। अतोऽस्य स्वामिनः पद्धतिरियं सर्वांशतः स्वीकार्या भवितुं नार्हतीति।

वैदिकमन्त्राणामर्थः नितान्तः गूढोऽस्ति ऋषिप्रदर्शित-मार्गानुसारेणाऽऽर्षदृष्ट्या चैव मन्त्रार्थानवबोधितव्यः। मन्त्राणां शब्देषु सत्यपि व्याकरणजन्यसरलता, तेषामभिधेयार्थस्यान्वेषणं नितान्तं दुरुहमस्ति। गूढार्थप्रतीत्यर्थमस्य मन्त्रस्य रहस्यवादमिदं द्रष्टव्यम्—

चत्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्याम् आविवेश॥

—ऋक्. 4.58.3

अस्य मन्त्रस्य सामान्योऽर्थः—अस्य चत्वारि शृङ्गानि, त्रीणि पदानि, द्वे शिरसी, सप्त हस्ताश्च सन्ति। प्रकारत्रयेण बद्धोऽयं वृषभस्तारस्वरेण कोलाहलं करोति। महादेवो मर्त्यलोके प्रवेशमलभत्। किञ्चास्त्यत्र जिज्ञासाविचित्रवेषधारकः कोऽयं महादेववृषभः? यास्केनास्य मन्त्रार्थस्य रहस्योद्घाटनं कृतम्। केषाञ्चिन्मते महादेववृषभोऽयं यज्ञोऽस्ति। चत्वारो वेदाऽस्य चत्वारि शृङ्गानि सन्ति, त्रीणि पदानि तु त्रिकालिकसवनकर्माण्येवा, द्वे शिरसी तु प्रायणीय-उदयनीन-नाम्नी द्वे हविषी स्तः। सप्तहस्तास्तु सप्तछन्दांस्येव सन्ति। यज्ञोऽयं मन्त्र-ब्राह्मण-कल्पैस्त्रिधा बद्धोऽस्ति। अनेन प्रकारेण यज्ञरूपेण महादेवो यजनार्थं मरण-धर्मिषु प्रविष्टोऽभवत्। अन्ये तु महादेववृषभोऽयं सूर्योऽस्ति, यस्य चत्वारो दिश एव चत्वारि शृङ्गाणि सन्ति, त्रयो वेदाः पादत्रयमस्ति अहोरात्रञ्च द्वे शिरसी स्तः, सप्तकिरणानि च सन्ति सप्तहस्ताः।

सूर्यस्तु पृथिव्याकाशान्तरिक्षैः सम्बद्धोऽस्ति, किं वा ग्रीष्म-वर्षा-शिशिर-ऋतूनामुत्पादकोऽयमस्ति सूर्यः, अतोऽसावस्मिन्मन्त्रे त्रिधा बद्धः इति कथ्यते (नि. 13.3)। पतञ्जलिना पस्पशाह्निकेऽस्य मन्त्रस्य शाब्दिकव्याख्या समुपस्थापिता। तन्मते तु महादेवोऽयं शब्दोऽस्ति, यतोऽस्य चत्वारि शृङ्गाणि चतुर्विधशब्दाः (नाम-आख्यात-उपसर्ग-निपाताः) सन्ति, त्रीणि पदान्यस्य भूत-वर्तमान-भविष्यत्-त्रिकालमेवाऽस्ति, द्विविधा भाषा नित्या कार्या चेति द्वे शिरसी सप्तहस्तास्तु प्रथमादि सप्तविभक्तयस्सन्ति। शब्दस्योच्चारणन्तु हृत्-कण्ठ-मुखत्रयमाध्यमेन भवति, अतोऽयं शब्दस्त्रिधा बद्धोऽस्ति। शब्दगतार्थस्य वृष्टिकरणेन शब्दोयं वृषभपदवाच्यो भवति। राजशेखरेणास्य मन्त्रस्य व्याख्या स्वकीयकाव्यमीमांसायां साहित्यशास्त्रदृष्ट्यैव कृतेति। सायणभाष्ये एतदतिरिक्तार्थस्यैव वर्णनमस्ति। उपरि वर्णितेष्वर्थेषु प्रत्येकार्थः परम्परित एवाऽस्ति, अतः सर्वे तेऽर्थाः स्व-स्वदृष्ट्या समादरणीयाः माननीयाश्च सन्ति। मन्त्राणां गूढार्थस्येयमेव महिमा भवति। तेषां पवित्रमन्त्राणामर्थः विविधरूपेण कर्तुं शक्यते। यास्केनास्मिन्प्रसङ्गे षडाधिकमतानां चर्चा कृतेति। अस्यां चर्चायामैतिहासिक-वैयाकरण-परिव्राजक-याज्ञिकादयः प्रमुखाः सन्ति। एतदिरिक्तः विविधग्रन्थानां समर्थकाचार्याणां मतस्य अपि यथास्थाने उल्लेखो मिलति। परम्परामूलकाना-मेतेषामाचार्याणां मतस्योपहासं कर्त्तुं न शक्यते कोऽपि।

4. सायणाचार्यः

सायणाचार्यस्तु वैदिक-सम्प्रदायस्य यथार्थवेत्तासीत्। अद्यापि वेदानामर्थनिर्णये सायणभाष्यमेव प्रमाणरूपेण स्वीक्रियते। अयं वेदवेत्ता तैत्तिरीयशाखाध्यायी आन्ध्रब्राह्मण आसीत्। अनेन महाभागेन सायणेन 1364 खीष्टाब्दतः 1378 खीष्टाब्दं यावत् विजयनगरसंस्थापकस्य महाराजबुक्कस्य प्रधानामात्यपदं अलंकृतम्। तदनन्तरं 1379 खीष्टाब्दतः 1387 खीष्टाब्दं यावत् महाराजहरिहरद्वितीयस्य अमात्यपदमनेन विदुषा अलंकृतम्। स्वकीयेन अग्रजेण माधवाचार्येण प्रेरितः सन् सायणाचार्यः वैदिकवाङ्मयस्य व्याख्याकार्ये संलग्नो बभूव। सर्वप्रथमं सायणाचार्यः कृष्णयजुर्वेदसंहितायाः भाष्यं रचयामास; तदनन्तरम् ऋग्वेदसंहिताभाष्यं ततः सामवेद-संहितायाः भाष्यं चकार। संहिताभाष्यस्य अन्तिमे चरणेऽनेन महाभागेन अथर्ववेदसंहिताभाष्यं सम्पादितम्। यथा सायणाचार्येण लिखितमस्ति—

यज्ञं यजुर्भिरध्वर्युर्निर्मिमीते ततो यजुः।
व्याख्यातं प्रथमं पश्चादृचां व्याख्यानमीरितम्॥
साम्नामृगाश्रितत्वेन सामव्याख्याय वर्तते।
अनुतिष्ठासु जिज्ञासावशाद् व्याख्याक्रमोह्यहम्॥
व्याख्या वेदत्रितयामामुष्मिकफलप्रदम्।
ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति॥

अनेन प्रकारेण सायणाचार्यस्तु चतुर्णां वेदानामभिज्ञो विद्वान् आसीत्। अनेन विद्वद्वरेण ऋग्यजुस्समाथर्वसंहितासु ऐतरेय-तैत्तिरीय-ताण्ड्य-षड्विंश-सामविधान-आर्षेय-देवताध्याय-वंश-शतपथब्राह्मणग्रन्थेषु तैत्तिरीय- ऐतरेय-आरण्यकयोः भाष्यं कृतम्। अद्यापि वैदिकावाङ्मयस्य दुरूहाणामर्थानां ज्ञानाय सायणभास्यस्य महती उपयोगिता वर्तते।

5. यास्काचार्यः

यास्कप्रणीते निरुक्ते वैदिक-शब्दार्थज्ञानस्य प्रक्रिया वर्णिताऽस्ति। निरुक्तं निरूपयन् सायणाचार्यो ऋग्वेदभाष्य-भूमिकायाम् आह, 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्।' यदि अन्यानि वेदांगानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तं वेदज्ञानस्य अन्तरङ्गेण अर्थेन समं सम्बद्धोऽस्ति। अन्यानि वेदाङ्गानि प्रायः सूत्रेषु निबद्धानि सन्ति; किन्तु निरुक्तं तु गद्यशैल्यां भाष्ये निबद्धमस्ति। निरुक्तेन वेदानामर्थावगमे सारल्यं सौविध्यं वा जायते। निघण्ट्वाख्यस्य वैदिककोशस्य भाष्यरूपमस्ति निरुक्ताख्यं वेदांगम्। निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति; परन्तु निरुक्तकारो यास्कः तेषां वैदिकानां शब्दानां निर्वचनं करोति। निघंटोः पञ्चानाम् अध्यायानां द्वादशाध्यायेषु व्याख्या चकार यास्कः।

वैदकिमन्त्राणां सार्थकतां प्रतिपादयन् निरुक्तकारः यास्कः लिखति, वेदाः वैदिकमन्त्राः वा सर्वथा सार्थकाः एव सन्ति। यदि मन्त्रेषु समागतानां पदानामर्थो नहि ज्ञायते, तर्हि तेषां पदानामर्थज्ञानाय प्रयासः करणीयः पदानाम् अर्थराहित्यं नहि स्वीकरणीयं भवति। अम्यक्, यादृश्मिन्, जर्भरी, तुर्फरी इत्यादिकानि पदानि सार्थकान्येव। यथा हि 'अम्यक्' इति शब्दस्य प्राप्नोतित्यर्थः। 'यादृश्मिन्' शब्दस्य यादृशः इत्यर्थो भवति। 'जर्भरी' शब्दस्य 'भर्त्तारौ' इत्यर्थो भवति। 'तुर्फरी' शब्दस्य च 'हन्तारौ' इत्यर्थो भवति। अन्धो न पश्यति स्थाणुं यदि, तर्हि नैष स्थाणोरपराधः। अपितु पुरुषापराधः एव भवति सः।

6. हलायुधः

सायणपूर्ववर्तिषु आचार्येष्वेकः हलायुधः एव एतादृशः विद्वान् बभूव, यः काण्व-यजुर्वेदसंहितायाः स्वकीयं विशिष्टं भाष्यं चकार। अस्य भाष्यस्य नाम ब्राह्मणसर्वस्वमस्ति। भाष्यारम्भे स्वकीयं परिचयं प्रतिपापदयन् हलायुधः आह—

बाल्ये ख्यापितराजपण्डितपदं श्वेतार्चिबिम्बोज्ज्वल-
च्छत्रोत्सिक्तमहामहस्तमुपदं दत्वा नवे यौवने।
यस्मै यौवनशेषयोग्यमखिलक्ष्मापालनारायणः,
श्रीमान् लक्ष्मणसेनदेवनृपतिः धर्माधिकारं ददौ॥

श्लोकेनानेन ज्ञायते यदसौ बाल्यावस्थायामेव राजपण्डितो बभूव। नवयौवने श्वेतच्छत्रधारणस्याधिकारं प्राप्तवान्। वार्धक्ये

व धर्माधिकारिणः पदमलंकृतवान्। बल्लालसेन-नृपतेरनन्तरमेव तस्यात्मजः लक्ष्मणसेनः राजा बभूव। अयमतीव कौशलेन गौडक्ष्मामपालयत्। बल्लालसेनस्य सिंहासनारोहणकालः 1170 खीष्टाब्दः तथा परलोकगमनकालः 1200 खीष्टाब्दः अस्ति। अत एव अयमेव कालः हलायुधस्यापि निर्धार्यते विपश्चितैः। विद्वद्वरेण शैवदर्शनस्य आचार्येण वेदमीमांसामर्मज्ञेन हलायुधेन ब्राह्मणसर्वस्वम्, मीमांसासर्वस्वम्, वैष्णवसर्वस्वम्, पण्डित-सर्वस्वञ्च पंचग्रन्थाः विरचिताः।

7. उव्वटः

ऋष्यादींश्च पुरस्कृत्य अवन्त्यामुव्वटो वसन्।
मन्त्रभाष्यमिदं चक्रे भोजे राष्ट्रं प्रशासति॥
आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।
मन्त्रभाष्यमिदं क्लृप्तं भोजे पृथ्वीं प्रशासति॥

अनयोः श्लोकयोः सुस्पष्टमस्ति यद् उव्वटस्य पितुर्नाम वज्रट आसीत्। काव्यप्रकाशस्य टीकाकारस्य भीमसेनस्य मतानुसारेण विद्वानयम् उव्वटाचार्यः मम्मटाचार्यस्य भ्राता आसीत्। विद्वद्वरेण आनन्दपुरनिवासिना उव्वटेन माध्यन्दिन-शाखायाः कृत्स्नं भाष्यं कृतम्, यदधुनाऽपि समुपलभ्यते। महाराजभोज-समकालिकोऽयं कश्मीरनिवासी विद्वान् उव्वटः माध्यन्दिनशाखायाः भाष्यनिर्माणकाले अवन्त्यां न्यवसत्। सर्वे जानन्त्येव यत् राजा भोजः परमारवंशीयः धारानगरस्य प्रशासकः आसीत्। येन 1018 खीष्टाब्दतः 1063 खीष्टाब्दपर्यन्तं शासनं कृतम्। अत एव अयमेव कालो उव्वटस्यापि निश्चीयते। अस्य विद्वद्वरस्य वेदविदुषः चत्वारो ग्रन्थाः समुपलभ्यन्ते, ऋक्प्रातिशाख्यटीका, ऋक्सर्वानुक्रमणीभाष्यम्, यजुःप्रातिशाख्यटीका, ईशावास्योपनिषद्भाष्यञ्च। सम्प्रति इमे सर्वे ग्रन्थाः प्रकाशिताः सन्ति।

8. माधवाचार्यः

चतुःसंख्यकानां माधव-नामकानां वेदभाष्यकाराणाम् उल्लेखं कुर्वन्ति विपश्चिताः इतिहासकाराः। एतेषु चतुर्षु माधवेषु एकः सामवेदसंहितायाः भाष्यकारः। अनेन विद्वद्वरेण सामवेदसंहितायाः प्रथमं भाष्यं कृतम्। भाष्यमिदं समग्रस्य सामवेदस्य द्वयोः आर्चिकयोः व्याख्यानं प्रस्तौति। अस्य भाष्यस्य नाम '**विवरणम्**' अस्ति। विवरणमिदं पूर्वार्चिकसम्बद्धं 'छन्दसिकाविवरणम्' तथा उत्तरार्चिकसम्बद्धम् 'उत्तरविवरणम्' इति अभिधानाभ्याम् प्रसिद्धमस्ति। विद्वद्वरस्य माधवस्य पितुर्नाम नारायणः आसीत्। द्वादशशतकस्य देवराजयज्वा स्वकीयनिघण्टु-भाष्यस्य अवतरणिकायां माधवाचार्यस्योल्लेखं करोति। अन्यं च माधवाचार्यस्य सामविवरणाख्यस्य भाष्यस्य मंगलाचरणे यः श्लोकः अस्ति, सैव कादम्बर्याः अपि मंगलाचरणे विद्यते,—

रजोजुषे जन्मनि सत्त्ववृत्तये,
स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे,
त्रयीमयाय त्रिगुणात्मने नमः॥

बाणभट्टस्य हर्षचरितेनापि ज्ञायते यद् बाणभट्टस्य गुरुः वेदवेदांगनिष्णातः (माधवाचार्यः) आसीत्। एतेन ज्ञायते यत् माधवाचार्यस्य कालः षष्ठशतकमस्ति।

9. महीधरः

नागरवंशीयस्य महीधरस्य जन्म काश्यां बभूव। शुक्ल-यजुर्वेदीयमाध्यन्दिनिशाखाध्यायी विद्वानयं काश्यामेव अध्ययनं कृत्वा महती प्रतिष्ठां लब्ध्वा च काशीनरेशस्य सभापण्डितो बभूव। तत्रैव विद्वद्वरोऽयं 'वेददीप' नामकस्य सामभाष्यस्य प्रणयनं चकार। यद्यपि भाष्यमिदं मौलिकं नास्ति, तथापि अर्थवैशद्यदृष्ट्या ग्रन्थस्य महन्महत्त्वमस्ति। ग्रन्थस्यास्य पाण्डुलिपिः वाराणसेय संस्कृतविश्वविद्यालयस्य सरस्वतीभवनपुस्तकालये सुरक्षिता वर्तते। अस्य भाष्योपरि उव्वटभाष्यस्य छाया स्पष्टरूपेण दृग्गोचरी भवति। काशीवासी महीधराचार्योऽयं तन्त्ररहस्यज्ञः वैदिकमर्मज्ञश्च आसीत्।

10. दयानन्द-सरस्वती

आचार्यवरस्य आर्यसमाज-संस्थापकस्य महर्षेः दयानन्दस्य वेदव्याख्यानाम् सर्वथा नवीनं समाजोत्कर्षशीलञ्चास्ति। विद्वद्वरोऽयं सर्वप्रथमं शुक्लयजुर्वेदसंहितायाः भाष्यं रचयामास। तदनन्तरं ऋग्वेदसंहितायाः भाष्यं चकार। महर्षेः दयानन्दस्य आकस्मिक-देहावसानकारणाद् ऋग्वेदभाष्यमिदं सप्तम-मण्डलयावदेव पूरितमुपलभ्यते च। महर्षिणा दयानन्देन अग्नि-मरुत्-विष्णु-इन्द्रादिदेवानां पृथक् सत्तां स्वीकृत्य परमात्मशक्तेः वैविध्यं प्रकटीकृतम्। तस्य मते तु वेदः ईश्वरकृतः ईश्वरीयज्ञाननिधिः वा अस्ति। अत एव वेदाः सर्वाषां विद्यानामुत्सभूताः सन्ति। महर्षेः दयानन्दस्य वेदव्याख्यायाः मूलाधारा अष्टाध्यायीनिरुक्तमित्यादयाः ग्रन्था सन्ति। मन्त्रभाष्यविषये पदच्छेदस्तु अस्य महती विशेषता अस्ति।

11. अरविन्दः

आधुनिकेषु वेदव्याख्याकारेषु महर्षेः अरविन्दस्य विचार-सरिणः सर्वथा प्रशंसनीया उपादेया चास्ति। महर्षेः मन्तव्यमस्ति यत् वेदमन्त्रेषु उच्चतमं महत्तमं व्यापकं शाश्वतम् अपौरुषेयञ्च सत्यं निहितमस्ति। वेदमन्त्रास्तु दिव्यस्रोतैः प्रस्फुरिताः प्रादुर्भूताः वा सन्ति। एतेषां मन्त्राणां द्रष्टारः ऋषिगणाः आध्यात्मिक-शक्तिसम्पन्नाः गुह्यज्ञानयुक्ताश्च आसन्; यतः तत्र पर्यन्तं सर्वेषां सामान्यजनानां गतिः दृष्टिः वा सम्भवा नास्ति। अत एव व्याकरण-बलेन, व्युत्पत्तिबलेन, ऊहापोहेन वा वैदिकमन्त्राणां गूढार्थं कोऽपि

सम्यक्रूपेण ज्ञातुं न शक्नोति। समाधिनिष्ठाः योगिनः ऋषयः एव मन्त्राणां अर्थप्रकटने समर्थाः सन्ति। अतः वैदिकमन्त्रासु सिद्धानां वाणी अस्ति, या अन्तर्जगतः आध्यात्मिकतथ्यानां निरूपिका अस्ति।

12. प्रो. विल्सनाचार्यः

प्रो.एच.एच.विल्सन-महोदयः ऋग्वेदस्य प्रथमआंग्ल-अनुवादकः अस्ति। चिकित्साविज्ञानस्य उच्चशिक्षां लब्ध्वा विलसन-महोदयः **'ईस्ट-इण्डिया कम्पनी'** इत्यस्याः संस्थायाः टकसाले पर्यवेक्षकरूपेण भारतवर्षम् सम्प्राप्य स्वसौभाग्यम् अनुशंसन्तमत्रैव ऋग्वेद-सायणभाष्यस्य आँग्ल-अनुवादं चकार। यस्य प्रकाशनं 1850 खीष्टाब्दे अभवत्।

13. प्रो.ओल्डेनबर्ग

वैदिकव्याख्याकारेषु ओल्डेनबर्गस्य विशिष्टं महत्त्वपूर्णं च स्थानं वर्तते। अनेन जर्मन-विद्वद्वरेण ऋग्वेदस्योपरि स्वकीयं मार्मिकं विवेचनात्मकञ्च भाष्यं कृतम्, यत् 1909-1912 खीष्टाब्दे बर्लिनदेशात् प्रकाशितञ्च। ग्रन्थेऽस्मिन् विद्वद्वरेण ओल्डेनबर्गेण प्रतिसूक्तं पूर्ववर्ती-विदुषां व्याख्यानमुपस्थाप्य निर्देशपुरस्सरं स्वकीयं विवेचनात्मकं व्याख्यानं कृतम्, यत् ऋग्वेदस्य उत्कृष्टं भाष्यं मन्यते विद्वद्भिः।

15. वेदाङ्गानि
(Auxiliaries of The Veda)

अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि, इति व्युत्पत्यनुसारेण अङ्गशब्दस्य अर्थः उपकारको वर्तते। वेदार्थज्ञानाय येषां शास्त्राणाम् आवश्यकता भवति, तान्येव शास्त्राणि वेदाङ्गानि इति कथ्यन्ते। शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतींषि भवन्ति षड्वेदाङ्गानि—

शिक्षा कल्पो व्याकरणं, निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव, वेदाङ्गानि षडेव तु॥

वैदिकवाङ्मये सर्वप्रथमवेदमन्त्राणां यथायथोच्चारणम् आवश्यकम् अस्ति। अस्मिन् उच्चारणकर्मणि उपकारकं वेदाङ्गं शिक्षेति कथ्यते। वेदाध्ययनस्य मुख्यप्रयोजनं तु यज्ञ-यागादिकस्य कर्मकाण्डस्य अनुष्ठानम् अस्ति। एतस्मिन् अर्थे प्रवृत्तस्य वेदाङ्गस्य नाम कल्पोऽस्ति। शब्दानां प्रकृति-प्रत्ययादीनां समुचितं ज्ञानं व्याकरणं विना असम्भवम् अस्ति। अतः व्याकरणमपि वेदाङ्गमेवास्ति। निरुक्ताख्यस्य वेदाङ्ग-विशिष्टस्य विषयस्तु वैदिकानां पदानां व्युत्पत्तिप्रतिपादनम् अस्ति। वेदाः छन्दोबद्धाः सन्ति। अत एव तेषामुच्चारणाय छन्दोज्ञानम् आवश्यकमस्ति। ज्योतिषाख्यमन्तिमं वेदाङ्गम् यज्ञानामनुष्ठाने समुचितकालं स्मारयति निर्दिशति वा। एतेषां षड्वेदाङ्गानां विभाजनं पाणिनीयशिक्षायां निम्नप्रकारेण कृतमस्ति—

छन्दः पादौ तु वेदस्य, हस्तौ कल्पोऽथ उच्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य, मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव, ब्रह्मलोके महीयते॥

अत एव महाभाष्यकारेण महर्षिणा पतञ्जलिना अपि स्वकीये महाभाष्ये पस्पशाह्निके—

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ध्येयो ज्ञेयश्च

1. शिक्षाशास्त्रम्
(Accentuative Auxiliary of The Veda)

येन शास्त्रेण वेदमन्त्राणां शुद्धोच्चारणे सारल्यं साहाय्यं भवति तच्छास्त्रं शिक्षेति कथ्यते। अर्थात्, स्वरवर्णादीनां उच्चारणनियमबोधयित्री विद्या शिक्षेत्यभिधीयते। वेदेषु स्वरप्राधान्यं भवत्येव, स्वरभेदेन अर्थभेदसम्भवात्। इदं स्वरज्ञानं शिक्षाधीनं भवति। अत एव शिक्षाशास्त्रस्य वेदांगता युक्ता उपपद्यते, यतः अशुद्धोच्चारणेन महाननर्थः भवति। यथोक्तं पाणिनीयशिक्षायाम्—

मन्त्रो हीनः स्वरतो वर्णतो वा,
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति,
यथेन्द्रशत्रुः स्वरतोपराधात्॥

शिक्षायाः प्राचीनाः ग्रन्थाः प्रातिशाख्यरूपेण समुपलभ्यन्ते सर्वेषां वेदानां प्रातिशाख्यग्रन्थाः भिन्नाः सन्ति। तैत्तिरीयोपनिषदः शिक्षावल्ल्यां शिक्षाशास्त्रस्य प्रयोजनमुल्लिखितम् अस्ति,— "अथ **शिक्षां व्याख्यास्यामः, वर्णः, स्वरः, मात्रा, बलम्, साम सन्तान, इत्युक्तः शिक्षाध्यायः।**" अत्र वर्णः अकारादिः, स्वरः उदात्तादिः, मात्रा ह्रस्वादिकाः, बलमुच्चारणस्थानं ताल्वादिकम् साम निषादादिः, सन्तानो विकर्षणादिः।

शिक्षासाहित्यमतीव विशालं वर्तते; यथा पाणिनीयशिक्षा व्यासशिक्षा, भरद्वाजशिक्षा, याज्ञवल्क्यशिक्षा, केशवीशिक्षा वाशिष्ठीशिक्षा, पाराशरीशिक्षा, कात्यायनीशिक्षा, माध्यन्दिनी-शिक्षा, अमोघानन्दिनीशिक्षा, माण्डव्यशिक्षा, मल्लशर्मशिक्षा स्वरांकुशशिक्षा, नारदीयशिक्षा, माण्डूकीशिक्षा, स्वरभक्ति-लक्षणशिक्षा, अवसाननिर्णयशिक्षा, वर्णरत्नप्रदीपिकाशिक्षा षोडशश्लोकीशिक्षा, इत्यादयः।

यथेन्द्रशत्रुः 'स्वरतोपराधात्' बहुश्रुतमस्ति आख्यायिकेयं यत् विश्वरूपनामके त्वष्टुः पुत्रे इन्द्रेणाहते सति रुष्टस्त्वष्टा इन्द्रस्य हन्तारं पुत्रम् उत्पादयिषुः आभिचारिकं यागं कृतवान्। त